कैलासकुटुम्ब स्तोत्रम् - नागराजः

[खरनाम संवत्सरः, चैत्र मासे]

आनन्दनाट्याय विनायकाय, सर्पेन्द्रहाराय वरप्रदाय
दुःखापहर्ताय गजाननाय, गं बीजरूपाय नमोनमस्ते ।

कैलासवासाय विश्वंभराय, कालाग्निरुद्राय वृषध्वजाय
श्रीनीलकण्ठाय शिवाप्रियाय, नादस्वरूपाय नमश्शिवाय ।

कराब्जवीणाधृतसुन्दराङ्गीं, मुखारविन्दस्मितकोमलाङ्गीम्
सुरेन्द्रकन्दर्प नुताङ्घ्रियुग्मां, नगेन्द्रकन्यां निरतं स्मरामि ।

सरोजसंतुल्य पदारविन्दं, सदामनोभीष्ट वरप्रदत्तम्
हरीन्द्रसंस्तुत्य पुरारिपुत्रं, सहस्रनागेन्द्रफणान् भजामि ।

सुवर्णदिव्याम्बर शोभितायै, रुद्राक्षहाराय दिगम्बराय
वराळिवेण्यैच जटाधराय, गौरीशिवाभ्यां सततं नमस्ते ।